**2017**

**M. A. Part–II**

**SANSKRIT**

**PAPER–VII**

*Full Marks* : 100

*Time* : 4 Hours

***The figures in the right hand margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.***

**First Half – 60 Marks**

1. स्वाधीनोत्तरकालिके बंगीयसंस्कृतसाहित्ये रचितानां प्रमुखनाटकानां संक्षिप्तपरिचयो देयः । 12

अथवा

नित्यानन्दस्मृतितीर्थस्य व्यक्तित्वं कृतित्वञ्च प्रस्तूयताम् ।

2. अधोलिखितेषु ग्रन्थेषु कयोश्चिद्द्वयोः समीक्षा कार्या – 4×2

a) चिपिटकचर्वणम् ।

b) स्वातन्त्र्य-सन्धिक्षणम् ।

c) भारतलक्ष्मीनाटकम् ।

d) वङ्गीयप्रतापम् ।

3. बुद्धचरितमहाकाव्यस्य प्रथमसर्गस्य कथासारः प्रतिपाद्यताम् । 14

अथवा

असितमहर्षे आगमनं तथा बालकं दृष्ट्वा तेन यद् निगदितं तद् वर्णयन्तु ।

4. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या— 6

a) देवैरभिप्रार्थ्यमनल्पभोगं सार्धं तयाऽसौ बुभुजे नृपालः ।
सा चाथ विद्येव समाधियुक्ता गर्भं दधे लोकहिताय साध्वी॥

b) बोधाय जातोऽस्मि जगद्धितार्थमन्त्या भवोत्पत्तिरियं ममेति ।
c) चतुर्दिशं सिंहगतिर्विलोक्य वाणीं च भव्यार्थकरीमुवाच ॥

5. राज्ञः दीलिपस्य गुणवैशिष्ट्यं समुपवर्ण्यताम् । 14

अथवा

'उपमा कालिदासस्य' इत्युक्तेः यथार्थं पठितग्रन्थानुसारं प्रतिपाद्यताम् ।

6. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या— 6

a) क्व सूर्यप्रभवो वंशः? क्व चाल्पविषया मतिः?
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

b) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः॥





## Second Half [Marks-40]

1. उत्तररामचरितनाटकमवलम्ब्य भवभूतेः प्रकृतिचित्रणचातुर्यं सोदाहरणं प्रदर्शनीयम् । 14

अथवा

'उत्तररामचरितम्' इति नाटकस्य छायासीतानामकस्य तृतीयाङ्कस्य नाटकीयं वैशिष्ट्यमुल्लिख्य सम्यग् आलोच्यताम् ।

2. संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्यायताम् — 6

क्लिष्टो जनः किल जनैरनुरञ्जनीय —
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताड़नानि ॥

अथवा

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥

3. अलंकारशास्त्रानुसारं का संज्ञा विष्कम्भकस्य? पञ्चाननतर्करत्नप्रणीतस्य अमरमङ्गलनाटकस्य द्वितीयाङ्कस्यादौ उपस्थापितस्य विषकम्भकांशस्य नाटकीयतात्पर्यं विचार्यताम् । 14

अथवा

अमरमङ्गलनाटकस्य नायिका का? तस्याः चारित्रिकं वैशिष्ट्यं यत् प्रतिफलितं नाटके तत् उपवर्ण्यताम् ।

4. संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्ग व्याख्यायताम् – 6

चितरस्योद्धारो न पुनरभवद्धिग्भुजबलं
प्रतिज्ञां मे धिग् धिग् धिगपि मम देहस्थितिमिति ।
उवाचाश्रुद्रेकस्खलितवचनं यन्मम पिता
तदद्यापि भ्राम्यद्हृदयतलमालोड़यति मे ॥

अथवा

देशं दहति भेदाग्निर्ध्वान्तं हरति वैरिणाम् ।
भोक्तृद्वैधादनर्थश्च तस्मिन्नर्थश्च पश्यते ॥

—o—